# ಶ್ರೀ ಬ್ರಹ್ಮಣ್ಯತೀರ್ಥ ಮಂಗಲಾಷ್ಟಕಮ್

ಶ್ರೀಮಾನತ್ರ ದಿವಾಕರ: ಕರುಣಯಾ ಬ್ರಹ್ಮೌಘವಾಂಛಾಕೃತೇ
ಶ್ರೀಮತ್ಪೂಗವನಾನ್ವವಾಯತಿಲಕಾದ್ರಾಮಾರ್ಯವಿಪ್ರೋತ್ತಮಾತ್ ।
ಲಬ್ಧ್ವಾ ಜನ್ಮ ನೃಸಿಂಹಸೇವನರತ: ಕ್ಷೋಣೀಸುಚಿಂತಾಮಣಿ:
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯ ಇತೀರಿತ: ಸ ಭುವಿ: ನ: ಕುರ್ಯಾನ್ಮುನಿರ್ಮಂಗಲಮ್ ॥ ೧ ॥

ಪೂರ್ವಂ ಶುಭ್ರತನು: ಕಲಾನಿಧಿರಸೌ ಲೀಡಸ್ತಮೋಜಿಹ್ವಯಾ
ಮಾಲಿನ್ಯಸ್ಯ ವಶೋ ಯದೀಯಯಶಸಂ ತ್ರೈಲೋಕ್ಯಗಾನಾಂ ಕರೈ: ।
ಧಾವಲ್ಯಂ ಪುನರಾಪ್ತವಾನಪಿ ಹ್ರಸತ್ಯನ್ಯಪ್ರಭಾಲಾಭತ:
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯಯತೀಶ್ವರ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾತ್ ಪರಂ ಮಂಗಲಂ ॥ ೨ ॥

ಯದ್ವಾದಾಭಿಧಸಿಂಹನಾದಮತುಲಂ ವಾದೀಂದ್ರದಂತಾವಲಾ:
ಶೃಣ್ವಂತ: ಕಿಲ ದೂರತೋಽಪಿ ಚಕಿತಾ ದಿಕ್ಕಂದರಂ ಪ್ರಾದ್ರವನ್ ।
ಸೋಽಯಂ ಶ್ರೀಯತಿರಾಜಶೂರಮೃಗರಾಡ್ ವೃಂದಾವನೇ ಸಂವಸನ್
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯವರಾಭಿಧ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾತ್ ಪರಂ ಮಂಗಲಂ ॥ ೩ ॥

ಯಸ್ಯ ಶ್ರೀಕರಪಂಕಜಾದ್ಧೃತಮಹಾಮಂತ್ರಾಕ್ಷತೈ: ಸಾಧಿತಾ:
ಸರ್ವೇಽಭೀಷ್ಟಚಯಾ: ಸುರದ್ರುಮವರೈರ್ದಾತುಂ ನ ಶಕ್ಯಾ ಹಿ ತೇ ।
ಯದ್ವೃಂದಾವನಮೃತ್ತಿಕಾಧೃತಿರಹೋ ಕ್ರೂರಗ್ರಹೋದ್ಭಂಜಿಕಾ
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯವರಾಭಿಧ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾತ್ ಪರಂ ಮಂಗಲಂ ॥ ೪ ॥

ಶ್ರೀ ಭಾಸ್ವಾನಪರೋಽಯಮಾಂತರಮಸ್ತೋಮಸ್ಯ ಸಂಭೇದಕೋ
ಗೋಭಿಶ್ಚಿತ್ರಸುವರ್ಣರಮ್ಯತನುಭಿ: ಸಾಧ್ವಬ್ಜಸಂಹರ್ಷಕ:।
ಕಿಂಚಾತಿಗ್ಮರುಚಿರ್ಮನುಷ್ಯಸದೃಶಂ ಹರ್ಷೇಣ ದೃಶ್ಯಾಕೃತಿ:
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯವರಾಭಿದ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾತ್ ಪರಂ ಮಂಗಲಮ್ ॥ ೫ ॥

ಸಂಸಾರಾಂಬುನಿಧೌ ತರಂಗನಿಚಯೈ: ಸಂತಾಡಿತಾನಾಂ ಸತಾಂ
ನಿತ್ಯಂ ಪಾರಮಿತ: ಪರಂ ಮೃಗಯತಾಮಾಲಂಬನಾಪೇಕ್ಷಿಣಾಮ್ ।
ಜ್ಞಾನಾಭಿಖ್ಯದೃಡೋಡುಪೇನ ವಿಲಸನ್ ಸಂತಾರಕೋ ನಾವಿಕ:
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯವರಾಭಿದ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾನ್ಮುನಿರ್ಮಂಗಲಮ್ ॥ ೬ ॥

ಯದ್ವೃಂದಾವನಮಿಂದಿರೇಶಕರುಣಾವೃಂದಸ್ಯ ಸಂದಾಯಕಂ
ಮಂದಾರದ್ರುಮವಜ್ಜನೇಷ್ಟನಿಚಯಂ ಸಂಪಾದಯತ್ ಪಾವನಮ್ ।
ಸಾಂದ್ರಾನಂದಕದಂಬಮೂರ್ತಿರುಚಿರಂ ಸದ್ವೃಂದಸಂಸೇವಿತಂ
ಶ್ರೀಬ್ರಹ್ಮಣ್ಯವರಾಭಿದ: ಸ ಭುವಿ ನ: ಕುರ್ಯಾನ್ಮುನಿರ್ಮಂಗಲಮ್ ॥ ೭ ॥

ಸೇವ್ಯಾ ಕಣ್ವನದೀ ಪವಿತ್ರಸಲಿಲಾ ರಾಮಪ್ರಮೇಯೋ ಹರಿ:
ಕ್ಷೇತ್ರಂ ಜ್ಞಾನಸುಮಂಡಪಾಖ್ಯಮನಿಶಂ ಹ್ಯಬ್ಬೂರುನಾಮ್ನಾಽಸ್ತಿ ಯತ್ ।
ತದ್ರಮ್ಯಸ್ಥಲಭೂಷಣಂ ವರಗುರೋರ್ವೃಂದಾವನಂ ತದ್ಗತ:
ಶ್ರೀಬೃಹ್ಮಣ್ಯಯತೀಶ್ವರಶ್ಚ ಭುವಿ ನ: ಕುರ್ಯಾತ್ ಪರಂ ಮಂಗಲಮ್ ॥ ೮ ॥

ಇತ್ಯೇತದ್ವರಮಂಗಲಾಷ್ಟಕಮಿದಂ ಶ್ರೀ ಶ್ರೀನಿವಾಸೋದಿತಂ
ಸರ್ವಾಭೀಷ್ಟಕರಂ ಪ್ರಭಾತಸಮಯೇ ಭಕ್ತ್ಯಾ ಪಠನ್ ಮಾನವ: ।
ಮಂಗಲ್ಯಾದಿಶುಭಕ್ರಿಯಾಸು ಚ ವದನ್ ಬ್ರಹ್ಮಣ್ಯಕಾರುಣ್ಯತ:
ಸುಜ್ಞಾನಂ ವಿವಿಧಾರ್ಥಸಿದ್ಧಿಮಪಿ ಸ ಪ್ರಾಪ್ನೋತ್ಯಸೌ ಮಂಗಲಮ್ ॥ ೯ ॥

॥ಇತಿ ಶ್ರೀ ಶ್ರೀನಿವಾಸತೀರ್ಥಕೃತಂ ಶ್ರೀಬ್ರಹ್ಮಣ್ಯತೀರ್ಥ ಮಂಗಲಾಷ್ಟಕಮ್ ॥

# श्री ब्रह्मण्यतीर्थ मंगलाष्ठकम्

श्रीमानत्र दिवाकरः करुणया ब्रह्मौघवांछाकृते
श्रीमत्पूगवनान्ववायतिलकाद्रामार्यविप्रोत्तमात् ।
लब्ध्वा जन्म नृसिंहसेवनरतः क्षोणीसुचिंतामणिः
श्रीब्रह्मण्य इतीरितः स भुविः नः कुर्यान्मुनिर्मंगलम् ॥ १ ॥

पूर्वं शुभ्रतनुः कलानिधिरसौ लीडस्तमोजिह्वया
मालिन्यस्य वशो यदीययशसं त्रैलोक्यगानां करैः ।
धावल्यं पुनराप्तवानपि ह्रसत्यन्यप्रभालाभतः
श्रीब्रह्मण्ययतीश्वरः स भुवि नः कुर्यात् परं मंगलं ॥ २ ॥

यद्वादाभिधसिंहनादमतुलं वादींद्रदंतावलाः
शृण्वंतः किल दूरतोऽपि चकिता दिक्कंदरं प्राद्रवन् ।
सोऽयं श्रीयतिराजशूरमृगराड् वृंदावने संवसन्
श्रीब्रह्मण्यवराभिधः स भुवि नः कुर्यात् परं मंगलं ॥ ३ ॥

यस्य श्रीकरपंकजादृतमहामंत्राक्षतैः साधिताः
सर्वेऽभीष्टचयाः सुरद्रुमवरैर्दातुं न शक्या हि ते ।
यद्वृंदावनमृत्तिकाध्रुतिरहो क्रूरग्रहोद्धंजिका
श्रीब्रह्मण्यवराभिधः स भुवि नः कुर्यात् परं मंगलं ॥ ४ ॥

श्री भास्वानपरो..यमांतरमस्तोमस्य संभेदको
गोभिश्चित्रसुवर्णरम्यतनुभिः साध्वब्जसंहर्षकः।
किंचातिग्मरुचिर्मनुष्यसदृशं हर्षेण दृश्याकृतिः
श्रीब्रह्मण्यवराभिदः स भुवि नः कुर्यात् परं मंगलम् ॥ ५ ॥

संसारांबुनिधौ तरंगनिचयैः संताडितानां सतां
नित्यं पारमितः परं मृगयतामालंबनापेक्षिणाम् ।
ज्ञानाभिख्यदृडोडुपेन विलसन् संतारको नाविकः
श्रीब्रह्मण्यवराभिदः स भुवि नः कुर्यान्मुनिर्मंगलम् ॥ ६ ॥

यद्वृंदावनमिंदिरेशकरुणावृंदस्य संदायकं
मंदारद्रुमवज्जनेष्टनिचयं संपादयत् पावनम् ।
सांद्रानंदकदंबमूर्तिरुचिरं सद्वृंदसंसेवितं
श्रीब्रह्मण्यवराभिदः स भुवि नः कुर्यान्मुनिर्मंगलम् ॥ ७ ॥

सेव्या कण्वनदी पवित्रसलिला रामप्रमेयो हरिः
क्षेत्रं ज्ञानसुमंडपाख्यमनिशं ह्यब्बूरुनाम्नाऽस्ति यत् ।
तद्रम्यस्थलभूषणं वरगुरोर्वृंदावनं तद्गतः
श्रीबृह्मण्ययतीश्वरश्च भुवि नः कुर्यात् परं मंगलम् ॥ ८ ॥

**इत्येतद्वरमंगलाष्टकमिदं श्री श्रीनिवासोदितं**
**सर्वाभीष्टकरं प्रभातसमये भक्त्या पठन् मानवः ।**
**मंगल्यादिशुभक्रियासु च वदन् ब्रह्मण्यकारुण्यतः**
**सुज्ञानं विविधार्थसिद्धिमपि स प्राप्नोत्यसौ मंगलम् ॥ ९ ॥**

**॥इति श्री श्रीनिवासतीर्थकृतं श्रीब्रह्मण्यतीर्थ मंगलाष्ठकम् ॥**

**COLLECTION BY : NARAHARI SUMADHWA**
**FOR WWW.SUMADHWASEVA.COM**